আশা পাণ্ডুলিপি
1.464
ASHA ARCHIVES

श्रीगणेशायनमः॥ ॥श्रीमद्भद्रमरणजिविराजमानगंरस्थलेरवलदमंदमदप्रवाह॥प्रत्यूहनाशविधयेभुवनैकवंद्यपाया
दपारमहिमागिरिजात्मजन्मा॥ब्रह्मादयोपिनिजकार्यसमर्थभावंयस्यप्रसादकनवसमुपेयिवासः॥ततत्त्वबोधजननेकि
लहेतूमेकंवाग्देवताचरणपद्मयुगंनमामी॥शंभुंप्रणम्यशिरसास्वगुरुंजपास्यधन्वन्तरिश्वरकसुश्रुतवाग्भटादीन्॥आलो
क्यलोकविदितांश्चविचिंत्यसारमाचक्ष्महेविमलवैद्यविधानसारम्॥संक्षेपतसर्वमिहोच्यमानंतत्त्वात्रभूतंश्रुतगंप्रसिद्धः॥यो
गादिकंसिद्धगणोक्रमेवप्रत्यक्षदृष्टंह्यनुमानतोवा॥आयुष्यसौभाग्यसुखप्रजारोग्यानन्दकामीयपद्विरेषः॥उल्लासकैरुल्लासि
तोदिनर्तुनिशोन्नरायद्विभाजनेन॥आयुर्वेदिष्यंसुपुरणंयसस्यस्वर्गंप्रतेःकारणंसाध्वतंच॥आयुष्यसंयोजितरोगहारीसो
ध्यश्रिदंसर्वदासेवनीया॥वेदोत्यतिक्रमंचात्रप्रथमंलिष्यतेखुना॥ब्रह्मावेदाङ्गमष्टाङ्गमायुर्वेदंप्रकाशयत्॥श्लोकानांशतसाह
स्रमहस्त्रायसंयुतं॥हितायदेहिनांस्वीयांसंहितांविहितापुरा॥अयंप्रजापतिदक्षंसंहितानामपाठयत्॥ततोप्रजापतिंदक्षंदक्षं
सकलकर्मसु॥विदधीतमधिसांगंमायुर्वेदंमुपादिशत्॥अथदक्षक्रियादक्षस्त्वैद्योवेदमायुषः॥वेदयामासविद्वांशौसूर्य्यौ
शौसुरसुत्तमौ॥दक्षादधीत्यदक्षौवितेनतुसंहितास्त्रियां॥स्वयंभवशिरश्छिन्नभैरवेणाहुषाथतत्॥भस्त्रिभ्यांसंहितंतत्
स्यातत्तौजातौयज्ञभागिनौ॥एतैश्चान्यैवहुभिर्कर्मभिर्भियजांवरौ॥शंदृष्टदृष्टयोरिन्द्रःकर्मान्येतानियत्नवान्॥आयुर्वे
दंयथाधीतंददतुशतमन्यवे॥नाशत्यासत्यशंधेनमायुर्वेदंशतक्रतु॥अध्यापयामासवहून्नात्रेयप्रमुखान्मुनीन्॥

कामुकतापल्लीकवचनंबाधीरताहंकृतिः॥ऐश्वर्याभिमानिताविशयितानन्दोधिकश्चाटनंप्रख्याताहिरजोगुणोनसहिताएतेगुणाचेतसः॥नास्तिक्यंसुविषयतानिमयितालस्यंचदुष्टामती॥प्रीतिर्निंदितकर्मसर्मनिसहानिद्रालुताहर्निशम्॥अज्ञानंकिलसर्वतोपिसततंक्रोधोधतामूढता॥प्रख्यातास्तुतमोगुणोनसहितस्यैतेगुणाश्चेतसः॥तत्रःप्रभूतसत्वस्तुसात्विकपुरुषस्मृतः॥राजसस्तामसश्चैवत्रिविधस्तेनमानवः॥ततोभवन्महत्तत्वंबुद्धितत्वाणाभिधाः॥त्रिगुणंसत्वबहुलंनिर्मलस्फटिकोपमं॥चिच्छायापन्नचैतन्यंतद्विद्धामयमीरितं॥महतःत्रिगुणाजातीउहंकारस्त्रिगुणाश्चितः॥सात्विकोराजसश्चापितामसश्चेतिसस्त्रिधाः॥जातानिसात्विकात्तस्माद्दिद्रियाणिसराजसात्॥तानिश्रोत्रंत्वचानेत्रंरसनाघ्राणिकास्तथा॥वाग्धस्तचरणोपस्थगुदंचैकादशंमनः॥पंचबुद्धिंद्रियाणिपाहुपूर्वोक्तानिगतानिनु॥कर्मेंद्रियाणिपंचैवकथयंतिविपश्चिताः॥मनोबुद्धिंद्रियेविज्ञैःकर्मेंद्रियमपिस्मृतम्॥मनोधिष्ठितमेवेहमिंद्रियंयत्प्रवर्त्तते॥शब्दस्पर्शश्चरूपंचरसोगंधस्यनुक्रमात्॥बुद्धिंद्रियानांविषयाःसमाख्यातामहर्षिभिः॥वाच्यगाद्यंचगंतव्यंमानद्यन्त्यान्यमेवच॥कर्मेंद्रियानांविषयाःज्ञातव्यविषयोहतः॥तामसादप्यहंकारात्तन्मात्राणिसराजसात्॥पश्चात्पसत्यसंवंद्धातलिंगानिभवंतिहि॥शब्दतन्मात्रकंस्पर्शतन्मात्रकंरूपंतन्मात्रकं॥रसतन्मात्रकंगंधंतन्मात्रमितितानिनु॥तन्मात्रेभ्योवियद्वायुवह्निवायुवसुंधरा॥रत्राणिपंचजायंतेमहाभूतानितक्रमात्॥शब्दश्रोत्रेंद्रियाश्चापिछिद्राणिचविविक्रता॥वियतकथिताष्टेनेगुणागुणाविचारिभिः॥स्पर्शत्वगेंद्रियश्चापि

लघुस्पन्दनंस्तनोः॥चेष्टासर्वशरीरस्यवायोरेतेगुणामता॥रूपनेत्रेन्द्रियंपाकःसंतापनीस्नातास्तथा॥वर्णाभाभिस्तुतामर्चःशौर्यंवह्नेः
गुणाअमी॥रसोरसेन्द्रियंशैत्यंस्नेहश्चगुरुतास्तथा॥सर्वौषडवसंमूहश्चुक्रंवारिगुणास्मृता॥गंधोघ्राणेन्द्रियंवापिकाठिन्यंपृथ्वीगुणः
तथा॥वसुंधरागुणाएतेगदिताःगुणवादिभिः॥शब्दस्पर्शश्चरूपंचरसोगंधश्चतत्क्रमात्॥तन्मात्राणिविशेषास्युःस्थूलाभावमुपाग
ताः॥प्रकृतिकारणायोगात्मतापकृतिरेतसाम्॥महतत्वादयःसप्तःसर्गेविकृतियःस्मृताः॥महतत्वादयःसप्तप्रोक्तप्रकृतयोपिच
॥दशेन्द्रियाणिचित्तंचमहाभूतानिपंचच॥एतानिसृष्टिजाद्विःविकाराषोडशास्मृता॥एवंचतुर्विंशतिभिस्तत्वैसिद्धंवपुर्गृहे॥जीवा
त्मानियतेनिष्प्रवसंतिस्वांतदूतवान्॥सदेहीकथ्यतेपापपुण्यःदुःखसुखादिभिः॥व्याप्तोवद्धश्चमनसाकृतिभिःकर्मबंधनैः॥इच्छाद्वेषसु
खसुखानिविषयाज्ञानंप्रयत्नोमनःसंकल्पश्चविचारणास्मृतिरथोःबुद्धिकलाविज्ञताः॥प्राणास्योपरिणायनंगुरुत्वमद्वायोरधोगा
नेत्रोन्मेषकृत्यकारणात्माहश्चजीवेगुणाः॥इतिश्रीवैद्यनाथदेवानन्दविरचितायांपूर्वखण्डेदेहोत्पत्तिसृष्टिक्रमकथनंनामप्रथमोध्यायः
१॥अथाजस्रलाभावमाह॥द्वादशावत्सराउर्द्धमापंचाशत्समाःस्त्रियः॥मासिमासिभगद्वारात्प्रकृत्यैवार्त्तवंश्रवेत्॥आर्त्तवश्रावदिवसाद्दनुः
षोडशरात्रयः॥गर्भग्रहणयोग्यस्तुसस्वसमयस्मृतः॥आर्त्तवश्रावदिवसाच्चहंसावद्ब्रह्मचारिणी॥शयीतदर्भशय्यायांवस्त्रदर्पिपतिन
च॥कराशरावेपर्णेवाहविष्यंचाहमाचरेत्॥अश्रुपातनखच्छेदमभ्यंगमनुलेपनम्॥नेत्रयोरञ्जनंस्नानंदिवास्वापंप्रधावनं॥अन्यच्चश
ब्दःश्रवणाहसनंवहुभाषणं॥आयासंभूमिखननंप्रवातंचविवर्जयेत्॥अज्ञानानात्वाप्रमादाद्वालौल्याद्वादैवतश्चवा॥साचेत्कुर्या

त्रिषिद्धा निगर्भो हेयो ऽतमाप्नुयात्॥ एतस्यागेस्त्रा ऽर्भो भवेद्विकृतलोचनः॥ नखच्छेदेन कुनखी कुष्ठी
त्वम्पेगतो भवेत्॥ अतुलेन तथा नास्त्रा ऽदुःखशीलो जनाद्दक॥ स्वापशीलो दिवास्वापाच्चंचलः स्यात्प्रधावमा
त्॥ अत्युच्चशब्दश्रवणाद्बधिरः खलु जायते॥ तालहंतौष्ठजिह्वासु स्यावोहसनतो भवेत्॥ प्रलापी भूरिकथ
नाद्उन्मत्तस्तपरिश्रमात्॥ खलतिर्भूमिखननाद्उन्मत्तो वातसेवनात्॥ ततः चतुर्थे दिवसे स्त्रातासद्यसाना
दिभिः॥ भूषिसुमनाव्यश्रेष्ठ भर्त्तारं समलंकृते॥ पूर्वं पश्यद्दतुष्टातायादृशं त्वरमऽनाः॥ तादृशं जनयेत्पुत्रं
ततः पश्येत्पतिं प्रियं॥ प्रहृत्सलिलेक्षिप्तं ऽव्यंगछत्पधोयथा॥ तथावहतिरक्तेतुक्षिप्तं वीर्यमधोव्रजेत्॥
आयुक्षयभयाभर्त्ता प्रथमे दिवसे तथा॥ द्वीतियेपिदिने रत्यैर्त्यजेद्दतुमती स्त्रियं॥ तत्रः पश्चा॰ हितो गर्भजा
यमानो नजीवती॥ अहितो यस्तृतीये॰ ह्रिस्वल्पायुरिकलांगकः॥ अथ चतुर्थी प्रष्टी स्यादष्टमी दशमी त
था॥ द्वादशी चापि या रात्रिस्तस्यां तां विधिना भजेत्॥ विधिना गर्भाधानोक्तविधि॥ अत्रोत्तरोत्तरं विद्याद्दा
युरारोग्यमेव च॥ प्रजा सौभाग्यमैश्वर्यं बलं चापि गमाफले॥ युग्मा युग्मा रात्रिमयुग्मस्य च फलमाहरेत्॥ यु
ग्मासु पुत्रजायन्ते स्त्रियो॰ युग्मासु रात्रिषु॥ स्नानचन्दनलिप्तांगः सुगंधसुमनोत्पनः॥ भुक्तवस्त्रसुवसनः
सुवेषः समलंकृतः॥ ताम्बूलवदनस्तस्यामनुरक्तो विकल्मलः॥ पुत्रार्थं स्पुरुषो नारीमुपेछपनेसुभे॥ अ

त्याशिनोऽधृतिः क्षुधामव्यथांगः पिवाशितः॥ वालोवृद्धोऽवलेगार्त्तस्त्यज्येद्रोगी च मैथुनं॥ ततः स्त्रीयादृशीयो
गपातादृश्युच्यते॥ पुरुषस्य गुणैर्युक्ता विहितं पुनर्भोजना॥ नारीऋतुमतीं पुंसां संगच्छेत्तत्सुतार्थिनी॥ रज
स्वलाव्याधिमती विशेषाद्योगिनी॥ वयोधिका च निष्कामा मलिनागर्भिणी तथा॥ एतासां संगमात्पु
सां वैगुण्यानि भवंति हि॥ तत्र रजस्वलादीनि त्रयं यावद्वतौ निषिद्धा॥ प्रथमेहनि चांडाली द्वितीये ब्रह्मघाति
नी॥ तृतीये रजकी पुंसां यथा वर्या तत्तथांगना॥ कामान्मिथुनसंयोगे शुद्धसोणितशुक्रजे॥ गर्भ संजायते
नार्याः स जातो बाल उच्यते॥ दंपत्योः कुष्टबाहुल्याद्दुष्टसोणितशुक्रयोः॥ यद्दंपत्योस्तयोर्ज्ञातं ज्ञेयं तदपि कु
ष्ठितम्॥ ऋतौ स्त्रीपुंसयोर्योगे मकराध्वजवेगतः॥ मेढ्रयोन्याभिसंघर्षाच्छरीरोष्मानिलाहतः॥ पुंसः सर्व
शरीरस्थो रेतोऽवयवतेयतत्॥ वायुर्मेढ्रनमार्गेणापातयंत्यंगनाभगे॥ तत्संश्रुत्य व्यात्तमुखं याति गर्भाशयं
प्रति॥ तत्र शुक्रवदायातेनार्त्तवेणायुतं भवेत्॥ शंखनाभ्याकृतिर्योनिस्त्रावर्त्ती साच कीर्तिता॥ तस्यां तृ
तीयत्वावर्त्ते गर्भस्तस्यां प्रतिष्ठिता॥ यथा रोहितमत्स्यास्यमुखं भवति रूपतः॥ तत्संस्थानं तथा रूपं गर्भ
शय्यापि दुर्बुधा॥ शुक्रार्त्तवसमाश्लेषो यदैव खलु जायते॥ जीवस्तदैव विशति युक्ताशुक्रार्त्तवान्तरम्॥ सू
र्य्येंदोः सूर्य्यमणितउभयस्माद्युता यथा॥ वह्निः संजायते जीवस्तथा शुक्रार्त्तवाद्युतात्॥ आत्मानादिरनंत

श्वाव्यक्तोवक्तुंनसक्यते॥चिदानन्दैकरूपोयंमनसापिनगम्यते॥एवंभूतोपिजगतोभाविनोवलवत्तरं
था॥अविद्यास्वीकृतेस्कर्मवशोगर्भंविशत्यशौ॥श्रोत्तावक्ताकर्त्ताचगंतारंतोत्सृजत्यपि॥दिनेव्यतीते
निपतेसकुचत्यस्तुजंयथा॥ऋतौव्यतीतेनार्यास्तुयोनिःसंह्रयतेयथा॥ऋतौरजोदर्शनान्त्वोऽशनिशावा
केकाले॥जीवेन्नर्वापुनाभिन्नेद्वौजीवेत्कुक्षिमागतौ॥यथावित्यभिधीयेतेधर्मेत्रपुरसरौ॥धर्म्मस्त
हितोऽधर्मस्तोपुरस्सरयथौ॥आधिकेरेतसपुत्रस्कन्यास्याहार्त्तवेधिके॥नपुंसकेतयोःसाम्येयथेच्छा
पारमेश्वरी॥वाग्भटमपिमप्याहयथाशास्त्रविजानता॥मजःमेदोवसामूत्रपित्तश्लेष्मसकृत्पसृक॥
रजोजलचदेहेस्मिनैकैकांजलिवर्द्धितः॥पृथकचपसृतंप्रोक्तंमोजोमालिकरेतसां॥द्वावंजलितुदुग्ध
स्यचत्वारोरजसस्तते॥समधातोरिदंमानन्विद्याद्वृद्धिक्षयावतः॥वैलक्षाशरीरगांमस्थायित्वानथैव
च॥होयधातुमलानांतुपरिमानान्नविद्यतः॥एवंतामभिसंगम्यपुनर्मासाङ्गजेदसौः॥शुक्रशोणितयोर्यो
नेरस्त्रावोथश्रमोद्भवः॥सक्थिसादध्विपासाचग्लानिफुर्त्तिभगेभवेत्॥स्तनयोर्मुखकावर्णस्याद्रोम
राजकमातथा॥अक्षिपक्ष्माणिचाप्यस्यासंमील्यन्तेविशेषः॥छर्द्दयेत्यथ्यभुक्तापिगंधाद्विजतेशुभा
त्॥प्रमेकःसदनंचैवगर्भिन्यालिंगमुच्यते॥पुत्रगर्भयुतायास्तुनार्यामासिद्वितीयके॥गर्भोगर्भासयेल

ष्पस्पिंडकाराग्रेपरंमृगः॥दक्षिणाक्षिमहत्वंस्यात्प्रावक्षीरंदक्षिणोत्तने॥दक्षिणोरुःसुपुष्टस्यात्प्रसन्नमुख
वर्णता॥पुत्रामध्येयदव्येषुस्वप्नेष्वपिमनोरथः॥आम्रादिफलमाप्नोतिस्वप्नेषुकमलादिच॥कन्यागर्भ
वतीगर्भेपश्चीमासिद्वितीयके॥पुत्रगर्भस्यलिंगानिविपरीतानिचेक्षते॥नपुंसकयदागर्भेभवेद्गर्भोवृद्धाक्ल
तिः॥उन्नतेभवतस्यार्श्वेपुरस्ताउदरंमहत्॥आसेकेश्वसुगंधीचकुंभिकश्चेर्ष्यकस्तथा॥अमीसशुक्रावोध
व्याअशुक्रस्याष्टकंतथा॥पित्रोस्तुस्वल्पवीजत्वादासेकाष्युरुषोभवेत्॥सशुक्रंपाश्यपलभंतेश्वजोन्नति
मसंशय॥पित्रोमाःमातापित्रोस्वल्पवीजत्वात्॥यष्यूनियोनौजायेतसहिसौगंधिकोभवेत्॥सयोनिसेफ
शोगंध्वमाघ्रायलभतेवलं॥स्वगुडेवृद्धचर्याद्यःस्त्रीपुंचत्यवर्त्तते॥सकुंभिकइतिज्ञेयोगुडंयोतिस्तुसस्मृतः॥
दृष्ट्वाव्यवायमन्येषांव्यपेयष्यवर्त्तते॥इर्ष्यकःसतुविज्ञेयोदृष्टियोगिश्वसस्मृतः॥योभार्यायामृतोमोहादंग
नेवप्रवर्त्तते॥तत्रस्त्रीचेष्टिताकाराजायतेकाष्ठसंज्ञकः॥अन्यामपिगर्भवत्यकृतिश्चप्रवक्ष्यते॥यदानार्यावुपे
यातांहयस्यन्योकथंचन॥मुंचत्योशुक्रमन्योन्यमनस्थितत्रजायते॥ऋतुस्नाताजुयानारीस्वप्नेमैथुनमाच
रेत्॥आर्त्तवंवायुराहायकुक्षौगर्भकरोहि॥मासिमासिप्रवर्द्धेतसकगर्भोगर्भलक्षणं॥कललंजायतेतस्याव
र्जितंपैतृकैर्गुणैः॥सर्यद्वश्चिककुष्माण्डाकृतयोविकृताश्चये॥गर्भस्तेयोषितस्तास्वज्ञेयापापकृतोभृशम्

॥गर्भोवातप्रकोपेनदाहदेचापमानिते॥भवेत्कुब्जःकुणिष्यंगुमूकोक्षिन्मिनयेवच॥आहाराचारचेष्टाभिर्या
दृशीभिःसमंचिनौ॥स्त्रीपुंशोसमपेयातांतयोःपुत्रोपितादृशः॥गर्भाशयगतिःशुक्रमार्त्तवंजीवसंज्ञकं॥प्र
कृतिःसविकाराचतत्सर्वगर्भसंज्ञकं॥कालेनवर्द्धितोगर्भोयद्यंगोपांगसंयुते॥भवेतदासमुनिभिःशरीरिति
निगद्यते॥अमस्तकादभीयंतेशिष्याश्रृणुतयत्नतः॥अद्यमंगंशिरस्योक्तंतदुपांगानिकुंतला॥तस्यार्न्नम
स्तुलेगंचललाटभुयुगंतथा॥नेत्रद्वयंतयोरर्न्नेवर्त्मतेद्वेकनीनिके॥दृष्टिद्वयंकृष्णगोलोश्वेतभागोचवर्त्म
नी॥पक्ष्माणपपांगोशंखोचकर्णोतिछ्रुकुलीद्वयं॥पाणिद्वयंकपोलोचनासिकाचप्रकीर्तिता॥ओष्ठा
धरौचसृक्किन्योमुखंतालुहनुद्वयम्॥दन्ताश्चदन्तचेष्टाचरसनाचिबुकंगलः॥द्वितीयमंगलेग्रीवातुयया
मुद्गाविधार्यते॥तृतीयंवाहुयुगलेतदुपांगान्यथवुते॥तत्रोपरिमतोस्कंधौपृगंडौभवतस्तथः॥कफोनियु
गमंतदधःस्त्रकोष्टयुगलंतथा॥मणिवंधौतलेहस्तौत्रयोश्चांगुलयोदश॥नखाश्चदशतेस्थाप्यादशछे
द्याश्चकीर्तिताः॥चतुर्थमंगलंवक्षस्तदुपांगान्यथवुवे॥स्तनौपुंसस्तथानार्योविशेषउभयोरयंयौवना
गमनेनार्योश्चीवरौभवतस्तनौः॥गर्भवत्याश्चसूतायास्तावेवक्षीरपूरितौ॥हृदयंपुराडरीकेनसदृशंस्या
दधोमुखं॥जायतस्तद्विकसतिस्वपतस्तु निमिलंतिः॥आवायस्तंतुजीवस्यचेतनास्थानमुत्तमं॥अत

स्तस्मिस्तमोव्याप्तेषाणिगाव्यस्त्वपंतिहि॥चेतनानामधिष्ठानंमनोदेहश्चसेंद्रियः॥केशलोमनखा
ग्रान्तर्मलद्रव्यंगुणैर्विना॥कक्षयोर्वक्षसःसंधियत्रगीसमुदाहृते॥कक्षेदुमेसमाख्यातेतयोस्यातांच
वंक्षणौ॥उदरंपंचमंचांगंषष्ठंपार्श्वेद्वयंमतं॥सपृष्ठंसपृष्ठंतुसमस्तंसप्तमंस्मृतं॥उपांगानीचकथ्यं
तेतानिजानिहियत्नतः॥शोणितंजायतेप्लीहामतोहृदयादधः॥रक्तवाहिशिरोभ्यांसमूलंख्यातोमह
र्षिभिः॥हृदयावामतोऽधश्चफुस्फुसोरक्तफेनजः॥अधोदक्षिणतश्चापिहृदयाद्यकृतःस्थितिः॥यत्तु
रंजकपित्तस्यस्थानंशोणितजंमतम्॥अधस्तुदक्षिणाभागेहृदयात्क्लोमतिष्ठति॥जलवाहिसीरा
मूलंतृष्णाच्छादनकृन्मतम्॥तथाचवृद्धवाग्भटमप्याहसृणुतत्परः॥रक्तादलिनसंयुक्तात्कालीयकस
मुद्भवः॥मेदश्शोणितयोःसारःकृष्णोयोपुगलंभवेत्॥तौतुपुष्टिकरौप्रोक्तौजठरस्थस्यमेहनः॥उक्तासा
द्रीस्त्रियोव्यामाद्युसामंत्राणिसूरिभिः॥अर्द्धव्यामेनहीनानियोषितोऽत्राणिनिर्दिशेत्॥उदकश्चकटी
वापित्रिकवस्तिश्चवंक्षणौ॥कराङ्गुलीप्रगेहस्यान्मेढ्रोऽध्वावीर्यमूत्रयोः॥सम्यगर्भस्याधानंकुर्य्याः
कर्भासयेस्त्रियाः॥शंखनाभ्याकृतियोनिस्त्र्यावर्त्तासाचकीर्तितातस्यातृतीयात्त्वावर्त्तेगर्भसम्यापति
ष्ठिताः॥वृषणौभवतःसारात्कफासृग्भ्यांसमेदसा॥वीर्यवाहिसिराधारातौमतौपुरुषावहौगुदस्यमान

सर्वस्य सर्वस्याचतुरंगुलं॥ तत्रस्य वलयस्तिश्रश्शंखवर्त्तनिभास्तुता॥ प्रवाहिणीभवेत्पूर्वामार्द्रांगुलमि
तामता॥ उत्सर्ज्जनीतु तदधः सामार्द्रांगुलमस्मिता॥ तस्याअधस्संचरणीस्यादेकांगुलिसंमिता॥ अर्द्धां
गुलप्रमानंतु बुधैर्गुदमुखंमतं॥ मलोत्सर्गस्यमार्गोयंपायुर्देहेविनिर्मितः॥ पुंसश्चोथौस्मृतौयौतुतेतो
नितंबौचयौषितौ॥ तयोकुकुंदरेस्यातांशकथीनीत्वंगमस्तमम्॥ तद्रपांगानिचबुमोजानुनीपिंडि
काद्वयं॥ जङ्घेद्वेगिठकेपार्ष्णीतलेचप्रपदेतथा॥ पादावंगुलयस्तत्रदशताशाखादराः॥ ॥इतिश्री
वैद्यनाथदेवानन्दकृतेवैद्यविधानसारेरजस्वलादिवर्णनोनामद्वितीयोध्यायः॥२॥ अथदोषादीमाह
दोषादिरसरक्तानांमांसमेदोस्थिमज्जनः॥ क्रमेणावक्षतेनूनमहर्षिनांप्रमानतः॥ वायुःपित्तंकफश्चे
तित्रयोदोषासमासतः॥ विकृताविकृतादेहंघ्नंतितेवर्त्तयंतिच॥ तेव्यापिनोपिहृन्नाभ्योरधोमध्योर्द्धसं
श्रयः॥ वयोहोरात्रिभुक्तानामन्तमध्यादिगोःक्रमात्॥ धातवश्चमलाश्चापिदुष्यन्तस्भियस्त॥ वातपि
तकफास्तेत्रयोदोषाइतिस्मृतः॥ तेधातवोपिविद्वद्भिर्गदितोदेहधारणात्॥ मलाश्चतेरसादीनामलिः
नीकरणात्मताः॥ दोषधातुमलादीनांनेताशीघ्रंसमीरणः॥ रजोगुणामयःसूक्ष्मोरूक्षःशीतोलघुश्चलः
॥ नेतास्थानांतरस्याप्यपीताःशीघ्रंभासुकारी॥ उत्साहोच्छ्वासनिश्वासचेष्टावेगप्रवर्त्तनैः॥ संम्यकग

त्याचधातूनामिन्द्रीयानांचपाटवे॥ अनुगृह्णातिविकृतोहृदयेन्द्रियचित्तधृक॥ रजोगुणामयःसूक्ष्मःशीतो
रूक्षोलघुश्चलः॥ खरोमृदुर्योगवाहीसंयोगादुभयार्थकृत॥ दाहकृत्तेजसायुक्तःशीतकृत्सोमसंस्रवात्
॥ विभागकरणाद्वायुःप्रधानंदोषसंग्रहे॥ पक्वाशयकटीशक्थीस्रोतोस्थिस्पर्शनेन्द्रियं॥ स्थानंस्वात
स्यतत्रापिपक्वाधानंविशेषतः॥ एकोवायुपित्तवत्तास्थानकर्मभेदैर्व्यंचविधः॥ उदानस्तद्वदुःप्राणाःस
मोनोऽपानएवच॥ व्यानश्चैतानिनामानिवायोःस्थानप्रभेदतः॥ कण्ठहृदितथाधस्ताकोष्ठवह्नेर्मलाशये
॥ सकलेपिशरीरेशोक्रमेणावनोवशेत॥ उदानोनामयस्तुर्द्धमुपैतिघवनोत्तमः॥ तेनभाषितगीतादिप्र
वृत्तिःकुपितस्तुसः॥ उर्द्धजत्रुगतानोगान्विदधातिविशेषतः॥ योवायुःप्राणनामासौमुखंगच्छतिदेह
धृक॥ सोन्नंप्रवेशयत्यन्नंप्राणाश्चाप्यवलम्बते॥ प्राशयस्कुरुतेदृष्टोहिक्काश्वासादिकान्गदान॥ भा
मपक्वाशयचारःसमानोवह्निसंगतः॥ सोन्नपचतितन्नाश्वविशेषान्विविनक्तिहि॥ सदुष्टोवह्निमांद्या
तिसारगुल्मान्करोतिहि॥ पक्वाशयालयोःपानस्कालेकर्षचाप्ययम्॥ समीरणाःसकृन्मूत्रशुक्रगर्भा
नेवान्यधः॥ कुद्धस्तुकुरुतेरोगान्घोरान्वक्षिगुदाश्रयान॥ शुक्रदोषप्रमेहाश्वव्यानापानप्रकोपजान॥
कृत्स्नदेहचरोव्यानोरसमम्वहनोयतः॥ स्वेदासृगश्रावणाश्चापिपंचधावेष्टयत्यपि॥ गत्यपक्षेपणोक्षे

यनिमेषोन्मेषणादिकाः॥प्रायः सर्वाक्रियास्तस्मिन्प्रतिबद्धाः शरीरिणां॥प्रस्पंदनश्चोद्वहनं पूरणंचविशोच
नं॥धारणंश्चेतिपंचैतान्श्रेष्ठाष्योक्तानभस्वतः॥कुद्धः संकुरुतेरोगान्प्रायशः सर्वदेहगान्॥युगपत्कुपितास्ते
देहं भिंद्युरसंशयः॥पित्तंउष्णंद्रवंपीतंनीलंसत्वगुणोत्तरं॥सरंकटुलघुस्निग्धंतीक्ष्णामम्लंकुपाकतः॥पाच
कंरंजकंचापिसाधकालोचकंतथा॥भ्राजकंचेतिपित्तस्यनामानिस्थानभेदतः॥अग्न्याशयेपक्वत्वीहहृदये
लोचनेद्वये॥त्वचिसर्वशरीरेषुपित्तंनिवसतिक्रमात्॥पाचकंपचतेभुक्तंशोषाग्निबलवर्द्धनं॥रसमूत्रपू
रीषाणिपिबेचयतिनीत्यशः॥यदुक्तंचरकाचार्य्यमप्याह विधिवत्सृणु॥भामाप्याग्नेयवायव्याश्चोष्मा
जःसनाभसा॥तथैववाग्भवोनूनमप्याहसृणुतत्पर॥गृहेस्थापितानिरत्नानिखद्योतवद्दूरभास्वराणि॥
तान्यपिदीपज्योतिषादूरप्रकाशकानिभवंति॥अत्रस्यपक्वासर्वेषांयत्कुराणमधिकोमतः॥तन्मूलास्तेहितेः
हृद्विक्षयद्विलक्षकामता॥पाचकंतिलमानस्यात्काठिन्यान्नास्यदोषता॥अनुगृह्णात्यविकृतंपित्तंवाको
ष्मदर्शनैः॥क्षुत्तृड्रुचिप्रभामेधाधीशौर्यतनुमार्दवैः॥पित्तंपंचात्मकंतच्चपक्वमाशयमध्यगं॥पंचभूतात्मक
त्वेपियतेनसगुणोदयात्॥पचत्यन्नंविभजतेसारकीट्टौपृथक्तथा॥तत्रस्थमेवपित्तानाशेषानामप्यनु
ग्रहं॥करोतिबलदानेनपाचकन्नामतस्मृतम्॥द्रव्यस्निग्धमधोरंचपित्तवद्भिरथोऽन्यथः॥सास्त्रांन्नरेत

थाचोक्तंवचनंलिप्यतेधुना॥अग्निर्भिन्नंगुणोयुक्तंपित्तमिन्नगुणोतथा॥द्रव्यंस्निग्धमधोगंचपित्तंवह्निर
तोन्यथा॥तस्यातेजोमयःपित्तंपित्तोमायःसशक्तिमान्॥समंचरतिकुक्षिप्यंसर्वतोधमनीमुखैः॥सकाया
ग्निःसकायोष्मासपक्तासचजीवनं॥अनन्यगतिरित्येवंदेहेकायाग्निरुच्यते॥वामपार्श्वाश्रितन्नाभेःकिंचि
त्सोमस्यमंडलं॥तन्मध्येमंडलंसौर्यंतन्मध्येग्निर्व्यवस्थितं॥जरायुःमात्रपछन्नःकाचकोशस्यदीपवत्
॥तथैवमधुकोशेपिइदंवचनदृश्यते॥जाठरोभगवानग्निरीश्वरोनस्यपाचकं॥सोक्ष्मारसानादहानोविव
क्तुंनैवशक्यते॥नाभोमध्यशरीरस्यविशेषात्सोममंडलं॥सोममंडलमध्यस्थंविद्यात्सूर्यस्यमंडलम्
।प्रदीपववत्तत्रनृणांस्थितोमध्यहुतासनः॥सूर्योदिवियथातिष्ठतेजोयुक्तैर्गभस्तिभिः॥विशोषयतिसर्वा
णि॥पल्वलानिसरांसिच॥तद्वशरीरिणांभुक्तंज्वलनोनाभिमाश्रितामयूरवैद्यचतेक्षिप्तंनानाव्यंजनसं
स्कृतं॥स्थूलकायेषुसत्वेषुयवमात्रःप्रमाणतः॥ह्रस्वकायेषुसत्वेषुतिलमात्रप्रमाणतः॥कृमिकीटप
टंगेषुवालमात्रोऽवतिष्ठितः॥रंजकनामयत्तीतंतद्रसंसोणितानये॥यत्तुसाधकसंज्ञंतन्मंगादिपाचकं॥
श्लेष्मास्वेतोगुरुस्निग्धपिच्छिलःशीतलस्तथा॥तमोगुणाधिकःस्वादुर्विदग्धोलवणोभवेत्॥एकःश्लेष्मा
वातपित्तवचनास्थानकर्मभेदैःपंचविधः॥कफस्येतानिनामानिक्लेदनश्चावलंबनः॥रसनःस्नेहनश्चापि

श्लेष्मनःस्थानभेदतः॥आमाशयेऽथहृदयेकण्ठेशिरसिसंधिषु॥स्थानेस्वेषमनुष्यानांश्लेष्मातिष्ठत्य
नुक्रमात्॥इतिप्रायेवदोषाणांस्थानान्यपिकृतात्मनां॥व्यापिनामपिजानियात्कर्माणिचपृथगपृथग
॥तेव्यापिनोपिऽहृन्नाभ्योरधोमध्योर्द्ध्वसंश्रया॥क्लेदनःक्लेदयत्यन्नंमात्मशक्त्यापराणपि॥अनुगृह्णाचि
चश्लेष्मस्थानान्युदककर्मणा॥रसयुक्तात्मवीर्येनहृयस्थावलंबनः॥त्रिकसंधीरणांचापिविदधात्येवलंब
णं॥उभावपियतःसौम्योतिष्ठतश्चांतिकेयतः॥यतोरसाच्चिजानीतोरसनारनौसमौ॥स्नेहनस्नेहदाने
नसमस्तेन्द्रियतर्पणः॥श्लेष्मणास्यसर्वसंधिनांसंश्लेष्मविदधात्यसौ॥तेदोषाधातवःसप्ततन्मलाउपधा
तवः॥मलमूत्रेचगर्भाद्यावुधैरुर्ध्वाउदाहृताः॥एतेसप्तरसयोस्थत्वादेहंदधतियत्नृणां॥रसासृग्मांसमेदो
स्थिमज्जःशुक्राणिधातवः॥प्रीणनंजीवनंलेपःस्नेहोधारणपूरणौ॥गर्भोत्पादश्चकर्माणिधातूनांकथिता
निहि॥यत्तोरसधातूर्य्यस्ततोभवदयंटसः॥सदैवसकलंदेहंरसतिमिरसस्मृतः॥सम्यक्पक्वस्यभुक्तस्य
सारोनिगदितोरसः॥सतुद्रवःसितशीतस्त्वाडस्निग्धश्चलाभवत्॥सर्वदेहचरस्यापिरसस्यहृदयस्थले॥स
मानमरुतापूर्वंवदयंहृदयेधृतः॥आरुह्यधमनींगत्वाधातून्सर्वावयंरसः॥पुष्णातितद्वत्स्वीयेव्याप्नोति
चतनंगुणैः॥मंदवह्निविदग्धस्तुकटुर्वाम्लोभवेद्रसः॥सकुर्याद्बहुलान्नोग्राञ्चिषक्तत्पकरोत्यपि॥यद्वारः

सोयकृद्यातितत्रंजकपित्ततः॥रागंपाकंचसंप्राप्यसभवेद्रक्तसंज्ञकः॥रक्तंसर्वशरीरस्थंजीवस्याधारउत्तमं
॥स्निग्धंगुरुबलेस्वादुविदग्धपित्तवद्भवेत्॥जीवोवसतिसर्वोस्मिन्देहेतत्रविशेषतः॥वीर्यरक्तेमलेयस्मि
न्क्षीणोयातिक्षयंक्षणात्॥यकृत्प्लीहावरक्तस्यमुख्यस्थानंतयोस्थितं॥अन्यत्रापिस्थितवतांरक्तानांपो
षकंभवेत्॥शोणितंस्वाग्निनापक्वंवायुनाचघनीकृतं॥तदेवमांसजानीयात्तस्यभेदानिपवुवे॥यथार्थं
सूक्ष्मरागयुक्तोवायुःस्रोतांसिहारयेत्॥अनुप्रविश्यपिशितेपेशीर्विभजतेतथा॥मांसपेशयसमाख्यातान्
रागांपंचशतानिहि॥तासांशतानिचत्वारिसाखामुखस्थितान्यथा॥कोष्ठोषडुत्तरषष्टिकथितामुनिपुं
गवैः॥ग्रीवायांऊर्द्ध्वगास्तास्तुचतुःत्रिंशत्प्रकीर्त्तिताः॥एकैकस्यात्तुपादांगुल्यात्रिस्रतिस्रस्ताप्यंचदशः१५
पादाग्रेदशः१०पादोपरिकुर्चमात्रविष्टादशः१०गुल्फतलयोर्दश१०गुल्फजानुनोरन्तरेविंशति·२०जानु
नीपंच५ऊरौविंशति२०वंक्षणोदश१०एकमेकस्मिन्सक्थिनीशतभवति॥येतेनेत्तरसक्थीवाहुचवि
ख्यातौ॥कोष्ठगतापाह॥गुदेतिस्र३मेफस्येका१मेवन्यामेक१वृषणायोर्द्वे२स्फिजोर्द्वेचपंच५।५वस्ति
मूर्द्धनिद्वे२उदरेपंच५नाभ्यामेका१पृष्ठोर्द्धसंनिविष्टाउभयतपंचपंचदीर्घा५।५पार्श्वयोर्दशदश वंक्षसि
दश१०अक्षकासोप्रतिसमंतान्सप्त७अंसौ॥स्कंधौ॥हृदिद्वे२यकृतिद्वे२प्लीहद्वे२ऊरुकेद्वे२ग्रीवायांचत

स्त्र॥४॥अम्बोरहो॰ट॰कंठमणौद्यष्टिकायामिति यावत्एका१गले१तालुनिद्वे२जिह्वायामेका१ओष्ठयोर्द्वे
२नासायांद्वे२चतस्त्रोगंडयो४र्द्वेनेत्रयो२र्द्वेकर्णयो२ललाटेचतस्त्र४शिरस्येका१एवंमांसपेश्यःपंचशतानि
भवंति॥स्त्रीणामपिभवत्येताश्चिंतुविंशतिरुत्तरा॥गर्भाशयेगर्भमार्गेयोनौचस्तनयोरपि॥एतापंचशनि
मांशपेश्यअधिकाविंशतिर्यथाः॥गर्भाशयेतिस्त्र३गर्भछिद्रसंस्थिता॥शुक्रार्तवप्रेवशिन्यस्तिश्र३योनाव
भ्यंतरतोमुखाश्रितेप्रसृतेद्वे२योनावेवहिर्चिंतेश्रोतव्यार्श्वद्वयास्थितेवर्तुलेयोनिकर्णिकेइतियावद्वे२स्त
नयोपंच५पंच५यौवनेतासांवृद्धिर्भवति॥पुंसांपेश्यःपुरस्ताद्याप्रोक्तासेहमनुष्कनाः॥स्त्रीणामावृत्यनि
ष्टंतिफलमंतर्गतेहिताः॥पञ्चपेशीसतान्येवस्त्रीवर्जेविद्धिभूमिपः॥अतश्चतिश्रोहीयंतेस्त्रीणांसेफसिमुष्क
योः॥मेदोहिसर्वभूतानामुरस्यस्थिषुस्थितं॥अतएवोत्तरेवृद्धिस्यायोमेदश्चिनोभवेत्॥मेदोयत्त्वाग्निनाप
क्वंवायुनाचातिशोषितं॥तदस्थिसंज्ञांलभतेसमारसर्वविग्रहैः॥अभ्यंतरगतैर्सारैर्यथातिष्ठंतिभूरुहाः॥
अस्थिसारैस्तथादेहाध्रियंतेदेहिनांध्रुवं॥तस्माचिरविनष्टेषुत्वङ्मांसेषुशरीरिणां॥अस्थिनीनविनश्यं
तिसारास्तानिसर्वथा॥शाल्यतत्रेस्थिखराणांशतत्रयमुदाहृतं॥तान्येवात्रनिगद्यंतेतेषांस्थानानि
यानिच॥सविंशतिशतंत्वस्थ्नाशाखासुकथितंबुधैः॥पार्श्वयोःश्रोणिफलकेवक्षपृष्ठोदरेषुच॥जा॰

नीयाभिषगेनेषु सतेसप्तदशोत्तरं॥ग्रीवायांदुर्द्वगोविद्याद्दशास्थ्नांषष्टित्रिसंयुताम्॥एकैकस्यांपादांगुर
ल्यांत्रिणित्रिनीतानिपंचदश १५ पादतलेपचास्थिशलाप्तद्दाधारभूतमेकमस्थि॥एकंषट्कुर्चेद्वे २ गु
ल्फेद्वे २ पाष्ण्यवेकं १ जंघयोर्द्वे २ जानुन्येकं १ एवंत्रिंसदकस्मिन्सकानिभवंति॥एतेनेत्तरशकथिवाहुचव्याख्या
तौ॥पार्श्वयोषट्त्रिंशत् ३६ शिश्नेभगेवाएकं १ गुदेयेकं १ नितंवयोरेकैकं २ त्रिकेएकं १ वक्षस्यष्टौ ८ पृष्ठे
त्रिंशत् ३० अक्षकसंज्ञेद्वे २ अग्निवोर्द्वगतान्याह॥ग्रीवायान्नवकंठनाड्यांचत्वारि ४॥हन्वोरेकैकं २ दंताद्वा
त्रिंशत् ३२ नाशायांत्रिनि ३ तालुन्येकं १ गंडयोरेकैकं २ शिरसिषट्द एतान्यस्थिनिपंचविधानिभवंतितानि
यथा·तरुणानिकपालानिभवंतिच॥वलयान्यपितानिस्युन्नलकाणिचकानिचीत्॥अक्षिकोशश्रुतिं
घ्राणग्रीवासुतरुणानिहि॥शिरशंखकपालेषुतालुंसप्रोथजादिषु॥कपालनिविजानीयाद्दचकानिरहा
मताः॥पाणिपोपार्श्वेयुगेपृष्ठेवक्षोजठरपायुषु॥पादयोर्वलयानिस्युर्नलकानिक्रवेधुना॥हस्तपादांगुली
तलेकुर्चेचमणिवन्धयोः॥वाहुजंघाद्वयेचापिजानीयान्नलकानितु॥मांसान्यान्त्रनिवद्धानिशिराभिस्त्रायु
भिस्तथा॥अस्थिन्यालंवनंकृत्वानदीर्यंतेपतंतिनः॥अस्थियत्त्वग्निनापक्वंतस्यसारोऽवोघनः॥यः स्विद
वत्सृग्भूतःसमजेत्यभिधीयते॥स्थूलास्थिषुविशेषेनमज्जातत्पत्तरेस्थितः॥होषत्रयःरसारक्तमांसमेदो

स्थिमज्जग ॥ इतिसंक्षेपतप्रोक्ताशुक्रंचान्यत्रउच्यते ॥ ॥ इतिश्रीवैद्यनाथदेवानन्दविरचितायांवैद्यविधा-
नसारेदोषादिधातूकथनंनामतृतीयोध्यायः ॥ ३ ॥ अथशुक्रोत्पत्तिमाह ॥ यतःसप्तनिधातूनांशुक्रोराजे-
तिविश्रुतः ॥ अतोशुक्राधिकारोत्रलिख्यतेविधिवत्मयाः ॥ रसाडक्ततोमांसंमांसान्मेदस्युजायते ॥ मेदसो
ऽस्थिततोमज्जाशुक्रस्यसंभवः ॥ यात्यामाशयमाहारपूर्वंप्राणानिलेरितः ॥ माधुर्यफेनभावंचषड्रसो
पिलभेतसः ॥ अहार्यषड्विधंभोज्यंभक्ष्यंचर्व्यंतथैवच ॥ लेह्यंचुष्यंतथापेयंतदुदाहरणानितु ॥ भोज्यमोद-
नसूपादिभक्ष्यंमोदकमंडले ॥ चर्व्यंचपिष्टधानादिरसालादितुलिह्यते ॥ चुष्यमाम्रफलेक्ष्वादिपीयतेपानकं
पयः ॥ नाभिस्तनान्तरंजंतोराहुरामाशयंबुधा ॥ उरोरक्ताशयस्तस्मादधःश्लेष्माशयःस्मृतः ॥ आमाशयस्तुत
दधस्तदधोदहनाशयः ॥ योवायुष्प्राणनामासौमुखंगच्छतिदेहधृक ॥ सोन्नंप्रवेशयत्यन्नप्राणाश्चाप्यवल
वतः ॥ श्लेष्मश्चतोगुरुःस्निग्धःपिच्छिलःशीतलस्तथा ॥ स्तमोगुणाधिकस्चाडविदग्धोलवणोभवेत् ॥ फेन-
भावंचलभतेजठरानलतेजसा ॥ मधुसंक्षिप्तःसमानेपचत्यामाशयस्थितं ॥ भदर्ज्योग्निर्यथावाह्यःस्थालीस्थ
तोयतंडुले ॥ ततःसमानमरुताग्रहनिंमभिधीयते ॥ ग्रहंणापच्यतेकोष्ठवह्निनाजातेकटु ॥ भौमप्याग्नेयवा
यव्याप्यचोष्माणाःसभाम्भसाः ॥ पंचाहारगुणान्क्चाश्वान्पार्थिवादीन्यचेत्पनु ॥ पंचभूतात्मकेदेहेआहारस्यां

चभौतिकः॥विपक्वस्यंचधासंम्यगणास्वानभिवर्द्धयेत्॥यिष्टपट्श्वमधुरमम्लोम्लेपच्यतेरसः॥कटुतिक्तक
षायानांविपाकोजायतेकटुः॥आहारस्यरससारसारहीनोमलद्रवः॥शिराभिस्तजलंनीतंवस्तिंमुत्रत्वमा
प्नुयात्॥समानवायुनानीतंततिष्टतिमलाशयो॥मूत्रंस्वपस्थमार्गेणापुरीषंगुदमार्गतः॥अपानवायुना
क्षिप्तंवहिर्यान्तिशरीरतः॥रसस्तुहृदयंयातिसमानमरुतेरितः॥सतुव्यानेनविक्षिप्तःसर्वान्धातून्विवर्द्धये
त्॥केदारेषुयथाकुल्याप्युप्तंतिविविधौषधी॥तथाकलेवरेधातून्सर्वान्पुष्णंतिमानवा॥स्थूलास्वंशम
लैर्भेदैस्तत्रत्रिधारसः॥स्वस्थूलोःस्वपरंसूक्ष्मस्तन्मलोयातितन्मलं॥धातौरसादौमज्जान्तेप्रत्येकंक्रमतो
रसः॥अहोरात्रान्स्वयंपंचसार्द्धंदंश्वतिष्ठति॥स्वाग्निभिपच्यमानेषुमज्जान्तेषुरसादिषु॥सत्सुधातुषुजा
यंतेमलानिसुनयोजगुः॥यथासहस्रधाध्मातेममलेकिलकांचने॥तथारसेसुहृपक्वेनमलेशुक्रतोगते॥व्र
जसर्वशरीरस्थस्त्रीग्धंशीतंस्थिरंमितं॥सोमात्मकंशरीरस्यबलपुष्टिकरंमतं॥गुरुशीतंमृदुस्निग्धंसाङ्गस्वा
दुस्थिरंतथाः॥प्रसन्नंपिच्छिलंसूक्ष्मंमोजोदशगुणंस्मृतं॥अष्टविंदुप्रमाणंतदीषदुष्णंसपीतकं॥अग्निसो
मात्मकत्वेनद्विरूपंवर्णितुन्नत॥व्रजस्तुतेजोधातूनांशुक्रार्त्तानांपरंस्मृतं॥हृदस्थपिव्यापिदेहस्थितिनिबं
धनं॥यस्यप्रवृद्धोदेहस्यतुष्टिपुष्टिबलोदया॥यत्राशोनियतोनाशोयस्मिंस्तिष्ठतिजीवनं॥निष्यद्यन्तेन

योभावा विविधा देहसंश्रयाः॥ उत्साहप्रतिजाधैर्यैलावण्यसुकुमारता॥ ततः शूलोभागोरसोमासेनप्र
संक्रमात्॥ योषितोऽपिस्रवत्येवशुक्रंपुंससमागमे॥ तत्रगर्भस्यकिंचिंतुकरोतितिनचिंतये॥ तदाना
र्यावुपेयातांवृषस्यंत्योकथंचनः॥ मुंचत्योशुक्रमन्योन्यमनस्थिस्तत्रजायतः॥ स्त्रीणांगर्भोपयोगित्वा
द्वार्त्तवंसर्वसंमतं॥ तासामपिवलंवर्णंशुक्रंपुष्टिंकरोतिहि॥ रसः शरीरेशब्दार्द्धिजलसंतानवत्त्रिधा॥
खंचरत्यनुरूपीयं नित्यमेवहिदेहिनां॥ वाजीकरणमौषध्यसोप्रभावगुणोच्छ्रयात्॥ इक्षुर्मासाश्वभ
क्षात्फलमजामलानिच॥ जनकानिनिगद्यन्तेरेचकानिचरेतसः॥ वालानांशुक्रमस्त्येवकिंतुसौक्ष्म्यां
नदृश्यते॥ पुष्पानांमुकुलेगंधोयथासंनपिनाप्यते॥ तेषांतदेवतारूपेपुष्टत्वाद्यक्तिमेतिहि॥ कुसुमा
नांप्रफुल्लानांगंधःप्रादुर्भवेद्यथा॥ रोमराज्यादयस्तेषांनारीनामपियौवने॥ जायतेतत्रयोभेदोज्ञेयोव्या
ख्यानतःसच॥ व्याख्यानंयथापुंसांरोमराजीश्मश्रुप्रभृतयः॥ नारीनांतुरोमराजीस्तनस्तन्यार्त्तवप्रभृत
यः॥ वार्धिकेवर्द्धमानेनवायुनारसशोषणात्॥ नतथाधातुवृद्धिस्यान्नतस्तत्रानिलंजयेत्॥ शुक्रसौम्यं
सितंस्त्रिवलपुष्टिकरंस्मृतं॥ गर्भवीजंवपुंसांरोजीवस्याश्रयउत्तमः॥ जीवोवसतिसर्वस्मिंदेहेतत्रविशेष
तः॥ वीर्यारक्तेमलेयस्मिन्क्षीणेयातिक्षयंक्षणात्॥ फटिकाभंडवंस्निग्धंमधुरंमधुगंधिच॥ शुक्रमिछ

त्रिकेछिन्नेतैलक्षौद्रनिभंचतत्॥यथापसिसर्पिस्तुगूढश्वेक्षौरसोयथा॥एवंहिसकलेकायेशुक्रंतिष्ठति
देहिनां॥घ्रंगुलेदक्षिणेपार्श्वेवस्तिद्वारस्यचाप्यधः॥मूत्रस्रोतस्यथेशुक्रंपुरुषस्यप्रवर्त्तते॥कृत्स्नदेहस्थितं
शुक्रंप्रसन्नमनसस्तथा॥स्त्रीषुव्यायच्छतश्चापिहर्षात्तत्संप्रवर्त्तते॥शुक्रंकामेनकामिन्याहर्शनात्स्पर्श
नामहि॥शब्दसंस्त्रवणाद्ध्यानात्संभोगाच्चप्रवर्त्तते॥रसादेवरजस्त्रीणांमासिमासिप्रवर्त्तते॥तद्वर्षा
द्वादशादूर्द्ध्वंयातिपंचाशतःक्षयं॥मासेगोपचितेकालेधमनीत्यस्तदार्त्तवं॥इयद्धिवर्णंकृत्स्नंचवायुर्योनि
मुखंनयेत्॥सशासृक्प्रतिमंयश्चयद्वालाक्षारसोपमं॥तदार्त्तवंप्रशंसंतियद्वाशोनविरंजयेत्॥अतिरक्तागु
णारक्तेवह्नेर्मासेतुपार्थिवाः॥मेदस्यपांभुवस्त्वस्थिपृथिव्यनिलतेजसां॥मज्जीशुक्रंचसौम्यस्यमूत्रेस्वरं
शिखिनोगुणाः॥भुवस्तथार्त्तवेत्वग्रेरसेर्क्षीरेतथांभसा॥कफपित्तंमलेखेषुप्रस्वेदोनखरोमच॥नेत्रविद्र
क्षुचस्नेहोधातूनांक्रमशोमला॥नेवजिह्वाकपोलानांजलेचरसमंजलः॥वनितानांप्रसूतानांधमनीस्त्या
स्तनौगतान्॥रसादेवहितायेनस्तन्यंस्तनयुगाशयम्॥सुद्रमांसस्यपस्नेहसावसापरिकीर्त्तिता॥मेदसस्तप्य
मानस्यस्नेहोवाकथितावसा॥शारङ्गधरमप्याहउपधातवसप्तके॥स्तन्यंरसोवसास्वेदोदन्ताश्चेशास्तथे
वच॥वजश्चसप्तधातूनांक्रमात्सप्तोपधातवः॥उरोरक्तासमस्तस्मादधःश्लेष्माशयःस्मृतः॥आमाशयस्तु

तद्धस्तस्त्रिकेचारकोवदन्॥नाभिस्तनांतरंजन्तोराहुरामाशयंबुधाः॥आमाशयदधस्यक्कादयाद्दर्द्धतुयाक
लाः॥ग्रहणीवामिकासैवकथितस्याचकाशयः॥उर्द्धमग्न्याशयोनाभेमध्यभागेव्यस्थितः॥तस्योपरितिले
ज्ञेयंतद्धपवनाशयः॥पक्वामयस्तुतद्धमस्वतुमलाशयः॥तद्धक्वथितोवस्तिमहिमूत्राशयोमतः॥कफा
मपित्तवातानामाशयामलमूत्रयो॥पूरुषेभ्योधिकाश्चान्येनारीणामाशयास्त्रयाः॥धरागर्भाशयाप्रोक्तपि
त्तपक्वाशयान्तरे॥स्तनौप्रसिद्धौतावेववुधैस्तन्याशयोमतौ॥स्त्रायुभिस्तुप्रतिछान्नासंतानाश्चजरायुजा॥
॥श्लेष्मनावेष्टिताश्चापिकलाभागास्तुताविदुः॥धात्वाशयान्तरेधातोर्यस्तेहस्त्वाधितिष्ठति॥देहोस्मनावि
पश्चसाकलेत्यभिधीयते॥आद्यामांसधराणामद्वितीयारक्तवाहिणी॥मदोधरातृतीयातुचतुर्थिश्लेष्मधारि
णी॥पंचमीतुमलंधत्तेषष्ठिपित्तधरामता॥रेतोधरासप्तमीस्याद्दितिसप्तकलास्मृता॥ ॥इतिश्रीवैद्य
नाथदेवानन्दकृतेशारीरस्थानेशुक्रोत्पत्तिआहारकलाकथनंनामचतुर्थोध्यायः॥४॥ ॥अथमर्म्मदिका
न्माह॥अष्टोस्युरस्थिमर्माणिसंधिमर्माणिविंसति॥शिरामर्माणिकचत्वारिशेकादशैवतुमांसमर्माणि
यथा॥स्त्रायुमर्माणिशप्तविंशति।एवंसप्तोत्तरंमर्मशतंधन्वंतरिर्ज्जगौ॥मर्माणिजीवधाराणिप्रायेणासु
नयोजगुः॥अतस्तेषुहताविंद्वादग्धाःस्युःखितानराः॥त्रिकवक्षेपृष्ठवंशमुभयत्रास्थिमर्माणि॥नाम्नांस

फलकेअर्द्धरालेवैकल्पकारिणी॥श्रोणेरुपर्युभयतपृष्ठवंशस्यसन्निधौः॥कतरुणतरुणयोर्द्वेअस्थि
मर्मणी॥आमाशयाच्छादनावंतरुपरिश्रीणिकाराडयोः॥मयोग्नेयाश्वसंवद्धोनितंबावस्थिमर्मणी॥अ
पांगाकर्णयोर्मध्येशंखावस्थिमर्मणी॥अर्द्धांगुलमितेतत्रहतसद्योविपद्यते॥मध्यगोभुजयोःपश्चा
त्कुर्पराःसंधिमर्मणी॥एकांगुलमितेतत्रहतोवैकल्यातामपि॥शिर्यस्यातःशिरांशंधिरुपर्यावर्त्तलक्षया
॥नामतोधिपतिःसंधिमर्मार्द्धांगुलमाशुहा॥निम्नयोस्तुभुवोरुर्ध्वमावर्त्तौसंधिमर्मणी॥अर्द्धांगुलमितेतत्र
हतोविकलतांव्रजेत्॥कृकाटिकेशिरोग्रीवासंधानेसंधिमर्मणी॥ अर्द्धांगुलमितेतत्रहतःस्याच्चमस्तके॥तथा
चरणसंधानेगुल्फोद्वौसंधिमर्मणी॥एकांगुलमितेतत्रहतःखाज्यंव्रजेनरः॥पृष्ठवंशतुभयतःकिंचिन्निम्नौ
कुकुंदरौ॥अर्द्धांगुलौवहिःपार्श्वेजघनासंधिमर्मणी॥पार्श्वप्रकोष्ठमध्यस्थावंगुलासंधिमर्मणी॥मणिव
न्धौतत्रहतःपक्षाघातमवाप्नुयात्॥संधयःपंचशिरसिविभक्ताश्चतुरंगुलाः॥संधिमर्मणिपत्रहतःपक्षाघातम
वाप्नुयात्॥अतऊर्द्धंप्रवक्ष्यामिशिरामर्मणितांजगु॥कटिनाडिमुभयतःशिरामर्मणितांश्चतुर्द्वेमणपेद्वेतु
नीलेष्टस्तत्रविद्धोविपद्यते॥चतस्रोमातृकाख्यातुग्रीवामुभयतःशिराः॥वेदांगुलाःशिरामर्म्मणपष्टोम
द्योमृतिप्रदाः॥त्रिराणामक्षिरसनाकर्मप्राणमिषायुषः॥योगाभृगारकानिस्युशिरोमर्मणिपूर्ववत्॥ने

त्रांतयोरपांगाख्येद्वेशिरामर्मणीस्मृते॥ अर्द्धांगुलमितेतत्रहतोवैकल्पमाप्नुयात्॥ स्यपरणीतुभ्रुवौमध्ये
शिरामर्मार्द्धमंगुलं॥ विशल्यघ्नंमर्मतत्रोद्धृतशल्योविपद्यते॥ अंतःश्रोतोद्वयानद्धेनासामुभयतःफणौ॥ अ
र्द्धांगुलेमर्मनिस्तोद्धाताद्वैकल्यकारिणी॥ स्तनमूलेमर्मणीस्तःस्तनयोर्द्वेगुलादधः॥ समःततःशिरेतत्रह
तःकालेनपश्यति॥ अभयत्रोरसोवातःतवहेज्योतुमर्मणी॥ अर्द्धांगुलेभयस्तंभोकालांतरमृतिप्रदे॥ पा
र्श्वद्वंद्वस्योपरिष्टादधस्तादंशयोशिरे॥ अर्द्धांगुलेभपालापोमर्मणीचिरमारके॥ हृदयंस्तनयोमध्येच
तरंगुलसंमितं॥ शिरामर्मात्रहतनरणात्सद्यएवविपद्यते॥ शिरामूलंशिरामर्मनाभिस्याचतुरंगुला॥ समंत
स्तत्रहतसद्योमृतिमवाप्नुयात्॥ अवस्तात्पार्श्वयोर्मध्येजघनस्योर्द्धमल्पसः॥ पृष्ठगोपार्श्वसंधीतेतीर्यगुर्ध्व
तुमर्मणी॥ स्तनमूलादुभयतःपृष्ठवंसमृजुशिरे॥ अर्द्धांगुलेवहत्योस्तोमर्मणीचिरमारके॥ उरुमर्ध्वध्वो
तोधस्ताद्वक्षणास्यागुलार्द्धकं॥ लोहिताक्षाणीमर्माणीयातांवैकल्यदाहिनी॥ उरुमध्येशिरेउर्व्योवंगुलेक
मितेसजुः॥ मर्मणीतत्रहतेवैकल्यमुपजायते॥ अथैकादशमर्माणीमांसनीकथ्यतेबुधैः॥ अर्द्धांगुलेनाम
तलहृदयंचिरमारकं॥ मांसमर्मचतुर्द्धास्यात्पाणिपतलमध्यगं॥ त्रयोदशांगुलादुर्द्धप्रतिपाद्विंदुचस्तयः
॥ मांसमर्माणीचत्वारिद्वंगुलात्मानिजंघयोः॥ अधसुवुकयोरर्द्धांगुलोस्तुतनरोहितोः॥ कालान्तरप्राणहृ

रेजायतेमांसमर्मगणि॥मध्योघातिगुदोमांसमर्मस्याचतुरंगुलं॥स्नायुमर्माणिचत्वारिस्युनेरजानुसंधि
तः॥उर्द्ध्वचोभयतोपाताद्व्यंगुलाविकलत्वहः॥मुष्यवंक्षणयोर्मध्येविटपौस्नायुमर्मणि॥एकांगुलमितेया
तोद्वैकल्पंकुरुतेभृशं॥द्वेवंक्षकक्षधारयोःस्नायोकक्षधराभिधेः॥मध्यएकांगुलेस्नायुमर्मणीहोःक्रिया
हरेः॥क्षिप्रस्थोर्द्ध्वतूभवतोधश्चकुर्चाःक्षमांगुलाः॥स्नायुमर्माणिचत्वारिहृतेयङ्मताःप्रहाःगुल्फसंधे
रधःकुर्चशिरांस्युभयतश्चतु॥स्नायुमर्माणिवैकल्यःकृतिचेकोंगुलानिवैः॥वस्तिःस्यात्स्नायुमर्मात्रवि
द्धेतुभयतोमरेः॥विनाविपद्यतेसद्यस्नाविपन्नथवाभवेत्॥पादांगुष्ठांगुलीमध्यंक्षिप्रमर्द्धांगुलोन्मितं।
।स्नायुमर्मबुःघातात्कालात्तरेमृतिः॥अंसमध्यभंगुलतुस्नायुमर्मद्वयंहरेत्॥तत्रस्यात्पक्षघातीनांकिंवा
निक्रियवाहुकः॥विधुरेकर्णापृष्ठाथःसंस्थितेस्नायुमर्मणि॥किंचित्तिश्रेतत्रधाताद्विकलोवधिरश्चना॥
केशांतेशखयोरूर्ध्वमुपोस्नायुंचमर्मणि॥अर्द्धांगुलेसमल्पेत्रजीवत्तोहृतशल्वकः॥संधयश्चद्विधाप्रा
क्ताश्चेष्टावंतश्चसंस्थिताः॥शाखासहन्त्रोःकक्षांचचेष्टावंतस्तुसंधयः॥शेषास्तुसंधयःसर्वेज्ञेयाःसुस्थि
रावुधैः॥दशाधिकंचद्विसतंमधोनामिदसर्वसः॥शाखासुतेष्टःषष्टिस्युरुनषष्टिस्तुकोष्ठगाः॥ग्रीवाद्वैतु
न्यशीतीश्चेसर्वेकीकसंश्रिताः॥चत्वारिसमूलशिरावात्तपित्तकफाश्रिताम्॥पृथकपृथकदशाधारा

स्नासांसप्तशतिभिधा॥सपंचसप्तन्यधिकशततांवायुगामगाः॥विभिधत्तेप्रतानेरेवेरेवन्याअपिसन्मृता॥
नीलाशीतामरुत्पूर्णाः शिरस्युर्मरुदाश्रयाः॥पीतोष्णापित्तलास्तास्तुश्लेष्मलाः स्युः सिताः स्थिराः॥यः स्त्रीहो
रक्तवहाकृष्णास्तुष्णारुगाः रुगाः॥प्रामुचंत्यभिहोदेहंनाभितःप्रसृताः शिराः॥प्रतावाः पयसिनिकंगधिसाहो
नायथाजले॥यथाउपत्रसेवाणे प्रसृताः स्युः समंततः॥तथाशिराः प्रतानाः स्युः प्रसरंत्यत्रवर्षगि॥यथापि
समृणालानिविवद्धंतेसमंततः॥भूमौपंकोदकस्थानितथामांसेशिरादयः॥स्नायवोवंधनानिस्युर्देहेमांस
सास्थिमेदसां॥मेदसः स्नेहमादायः सिरास्थूलाभवेद्यथा॥तदास्थायुत्वमाप्नोतिनाशानवरसतिभिदा॥शा
खामुखदरानोतासांग्रीवादौसप्तनिर्यथा॥गोस्तगास्त्रींशदधिकविशतस्तावयः स्मृता॥चतुर्विंसतिराख्याता
धमन्योरसवाहिका॥नाभेरुर्द्वदशधास्तादशवप्रसरंतिता॥द्वंद्वैतिर्यगतत्यग्नाः प्रत्येकं प्रभवंतिताः॥पार्श्वपृ
ष्ठोदरस्कंधग्रीवोरोवाहुशीर्षकं॥दधत्पूर्वगतस्तत्रायोधातास्थिनीभपि॥पक्वाशयकतीवस्तीविगामूत्रगु
उमेढुकं॥तिर्यग्गातास्त्वसंख्येयशाखावद्धंत्यधोवपुः॥अन्तर्वहिश्चदधतीरसंस्वेदंचपुष्टये॥अतीस्थूलाः स्त्रा
वस्तुः कराउराकराउनक्षमाः॥सर्वदेहक्रियाधारास्तुस्तभाः संन्यनाभिवः॥कंडराणोउशाख्यातास्तत्रशाखासुता
श्चतु॥पक्वामासपयोश्चापिचतस्त्रोवस्तिगाश्चतु॥उरपृष्ठपार्श्वयोश्चद्वंद्वेपिवचतुर्मताः॥प्रानोन्तरसरक्तास्तु

पललार्त्तवरेतसाम्॥मेदोमूत्रमलादीनांस्रोतांसि भिषजोजगुः॥नृदेहेदशरध्राणिनारीदेहेत्रयोदशः॥नाः
शानयनकर्णानांद्वेद्वेरध्रेप्रकीर्तिते॥मेहनापानवक्त्राणांमेकैकंरध्रमुच्यते॥दशमंमस्तकेतूक्तंरंध्राणिनु
नृणांविदुः॥स्त्रीणांत्रिणाधिकानिस्युःस्तनयोर्गर्भवर्त्मनिः॥सूक्ष्मछिद्राणिचान्यानिसनाभित्वविजन्मि
नां॥जालानुशिरास्नायुमान्मास्थ्यामुद्भवंनिहि॥तानिचत्वारिचत्वारिसुवर्णपवनयोरसः॥कुर्चौस्युहस्तयो
र्द्वौतुतावंतोपादयोरपि॥ग्रीवाद्यामेकएकस्तुमेढ्रेःसर्वेविषदःस्मृताः॥कुर्चोभपिशिरास्नायुमासास्थिप्र
भवास्मृताः॥पृष्ठंवंसस्योभयत्रमहभ्योन्मान्मारजवः॥चरत्योमात्मपत्नीमांवंधनंतत्प्रयोजने॥सेवन्यःसप्त
तासांतुभवेपुर्यंचमस्तके॥एकासेफसिहायामेकाविध्यत्रताक्वचित्॥चतुर्दशास्थ्नांसंघातातेषांत्रयोगु
ल्फजानुवंक्षणेषु॥एतेनेतरसक्थिवाहूचव्याख्यातौत्रिकशिरसोरेकैकभत्रतुत्रिकपदेनवाहुग्रीवास्थि
संघातउच्यते॥चतुर्दसैवसीमंताःकथितामुनिपुंगवैः॥संघाताक्षिवितायेसुशीमंतास्तेप्रकीर्त्तिता॥क्षिर
स्यपच्यमानस्ययथासंतानिकाभवेत्॥पच्यमानस्यशुक्रस्यरजसश्चतथात्वच॥पूर्वावभासिनीतासांमिश्र
स्थानंचसामता॥द्वितीयालोहिताज्ञेयातिलकालकजन्मभूः॥तिलकालकान्यछव्यंगानामधिष्ठ्यते॥तृ
तीयातुभवेछेतास्थानंचर्मदलस्यसा॥मंडलाजगलिकामशकानामधिष्टानं॥तामाचतुर्थिःविज्ञेयाः

किलासच्छिन्नभूमिका॥पंचमीवेदनीनाम्नासर्वकुष्ठोद्भवास्ततः॥विख्यातालोहितायष्टीग्रंथिगण्डापचि-
स्थिति॥स्थूलात्वक्तत्रमीख्याताविड्ध्यादिस्थितिश्चमा॥अस्थ्नामलानिलोमाणिअसंख्यानिभवंतिहि
॥संतियावंतिलोमाणितामंतोलोमकूपका॥अंगप्रत्यंगनिर्वृत्तिःस्वभावादेवजायते॥संनिवेशश्चगात्राणा
न्नात्रास्तेकारणांतरं॥अंगप्रत्यंगनिर्वृत्तौयवभवंत्यगुणागुणा॥तेतेगर्भस्यविज्ञेयाधर्माधर्मनिमितजाः॥दं
तानांयतनंजन्मपुनःव्यातेत्वसंभवः॥तलेश्वनुद्भवोलोम्नामेतसंर्वस्वभावतः॥ ॥इतिश्रीवैद्यनाथदेवानन्द
कृतायांवैद्यविधानसारेमर्मादिविवेकोनामपंचमोध्यायः॥५॥ ॥अथगर्भेयद्भवतीतदाह॥गर्भाशयेनिप
तितेयादृक्शुक्रंतथार्तवं॥तादृगेवद्रवीभूतंप्रथमेमासितिष्ठति॥मरुत्पितकफैस्तस्थैर्व्यच्यमानोद्वितीय
के॥कललस्थमहाभूतसमुदायोघनोभवेत्॥भौमाप्याग्नेयवायव्याश्चोष्माणःमनोभसा॥तृतीमासिर
सिरसोहस्तयापादयोस्तथा॥पिंडाकाश्चसिध्यंतिसूक्ष्माअवयवास्तनो॥सर्वांगांगाम्युपांगानिचतु
र्थेसुःस्फुटानिहि॥हृदयव्यक्तिभावेणाव्यजतेचेतनापिच॥तस्माचतुर्थेगर्भेस्तुनानाचस्तुनिवांछति॥त
त्रद्विहृदयायत्स्यानारीदोहृदिनीमता॥दोहृदावत्तयानारीकुणांकुब्जेचवामने॥विकृताक्षमनेक्षंवापुत्रना
रीप्रसूयते॥यतस्त्रीदोहृदेप्राप्तवीर्यवंतेचिरायुषे॥पुत्रंप्रसूयतेतस्मातस्यैवांछितमर्पयेत्॥इंद्रियार्था

नसौयान्यान्भोक्तुमिच्छतिगर्भीणी॥गर्भधावाभयस्तातान्भिषमाहूयदापयेत्॥साप्राप्तदौहृदापुत्रंजनयेत
गुणान्वितं॥अलब्धदौहृदागर्भेलभेतात्मनिवाभयं॥येषुयेष्वेन्द्रियार्थेषुदौहृदेसावमानिता॥प्रसूयतेसुतं
सार्त्तितस्मितस्मिन्नदिन्द्रिये॥राजसंदर्शनेयस्यादौहृदंजायतेस्त्रिया॥अर्थवंतंमहाभागंकुमारंसाप्रसूयते
॥दुकूलपट्टकौशेयभूषणादिषुदौहृदात्॥अलंकारैर्विनंपुत्रंललितंसाप्रसूयते॥आस्रमेसंयतान्मानेधर्मशी
लप्रसूयते॥देवताप्रतिमायानुप्रसूतेपार्थदोषमं॥दर्शनेव्यालजातीनांहिंसाशीलंप्रसूयते॥रक्ताक्षंलोम
संपूर्णंमहीषामिषदौहृता॥वराहमांसेस्वप्नालुंशूलंवजनयेत्सुतं॥मृगमांसेतुजंघालंविक्रांतंवनचारिणं॥
अतोनुक्तेषुयानारीदौहृदंविदधातिहि॥शरीराचारशीलैश्चसमानंजनयिष्यति॥पंचमेमासंसंपृष्टेबुद्धिश्चाः
पिप्रबुध्यते॥सर्वांगप्रगान्सुमांगाणिभृशंव्यक्तानिसप्तमे॥व्रजोष्टमेसंहरतिमातापुत्रौमुहुस्क्रमात्॥तेनतौ
म्लानमुदितौस्यातांजातोनजीवती॥नजीवत्यष्टमेजातत्रौजोनस्थिरंयतः॥तथानैऋतंभागत्वादापयंत
द्बलिंततः॥नैरितायशभागश्चबालेषुक्रूरेनदत्तः॥अष्टमेमासिनैऋत्यांयमांसौदनंविलंपदापयेति॥नवमे
दशमेमासिनारीबालप्रसूयते॥एकादशेद्वादशेवाततोन्यत्रविकारतः॥गर्भेयदांप्रथमंभवतितंनिरुच्यते·
॥शिरोभवतिचांगस्यपूर्वमित्याहशौनकः॥शिरसेवोपजायंतेप्रधानानिन्द्रियाणितत्॥हृदयंजायतेपूर्वं

कृतवीर्योवदन्मुनि॥ बुद्धेश्चमनश्चापियतस्तत्स्थानमीरितं॥ पाराशर्य्यइतिप्राहपूर्वनाभिसमुद्भवः॥ प्रा
णोयत्रस्थितोदेहंवर्द्धयत्पूर्व्वसंयुतः॥ पाणिपादंभवेत्पूर्वंमार्कण्डेयमुनिर्मतं॥ देहिनामसकलाश्चेष्टाया
णिपादाश्रयायतः॥ प्रथमंजायतेकोष्ठंततःसर्वांगसंभवाः॥ सर्वांगपंगायुपाङ्गानियुगपत्संभवंतिहि॥
सूक्ष्मत्वान्नोपलभ्यंतेमतंधन्वंतरेमिदं॥ आमस्यानुफलेभवंतियुपत्मांसास्थिमज्जादयोलक्ष्यंतेनपृथक्
पृथकत्वगुणतयापुष्टास्तस्वस्फुटा॥ एवंगर्भसमुद्भवैत्ववयवाःसर्वेवयंत्येकहालक्ष्याःसूक्ष्मतयानते
प्रकटतामायांतिवृद्धिंगता॥ अथशरीरेपितृजामातृजाभागउच्यते॥ केशाश्मश्रुलोमाणिनखादन्ताःशि
राणितथा॥ धमन्यःस्नायवःशुक्रमेतानिपितृजानिहि॥ मांसासृग्मज्जमेदांसियकृत्प्लीहान्त्रनाभयः॥ हृदयंच
गुदंचापिभवंत्येतानिमातृतः॥ शरीरोपचयोवर्णोबलंदेहिस्थितिस्तथा॥ रसानितानिजायनोभिषजोमु
नयोजगुः॥ ज्ञानंविज्ञानमायुश्चसुखदुःखादिकंतथा॥ इंद्रियानिचसर्वाणिभवंतेतानिचात्मनः॥ अ
ग्निषोमौमहावायुर्त्रभःसत्वरजस्तमः॥ पंचेंद्रियाणिभूतात्मागर्भंसंजीवयंतिहि॥ गर्भस्यनाभिनाडीतु
नाडीरसवहास्त्रियाः॥ संलग्नान्तेनगर्भस्यवृद्धिर्भवतिनित्यसः॥ निश्वतोच्छ्वाससंक्षोभस्त्वघ्रानांसोधिग
छति॥ मातुर्निस्वसितोच्छ्वाससंक्षोभस्त्वघ्रसंभवान्॥ गर्भस्यनाभिमध्येतुज्योतिस्थानेध्रुवंस्मृतं॥ तद्

धमनिवाश्चदेहस्तेनास्यवर्द्धते॥उष्मणासहगतश्चापिहारयत्यस्यमारुतः॥उर्द्धतीर्यगधस्ताश्चश्रोतांसितुय
थातथा॥यथाहारयतिविस्तारयतिः॥दृष्टिश्चरोमकूपाश्चनवर्द्धतेकदाचनः॥ध्रुवान्येतानिमर्त्यानामितिध
न्वन्तरेर्मतं॥शरीरक्षीयमानेपिवर्द्धतेष्वविमोशदाः॥स्वाभावंप्रकृतिंकेचानखकेशाविति॥प्रकृतिं
कृत्वाकारणंकृत्वास्थितिमर्यादाः॥चेतनानामधिस्थानंमनोदेहश्चसोद्रियः॥केशलोमनखायांतमल
द्रव्यगुणैर्विनाः॥गर्भस्यवातविण्मूत्रोत्सर्गाकारणमुच्यते॥वातात्प्रत्यादयोगाच्चवायोपक्वाशयस्यच॥
॥वातमूत्रपरीषाणिगर्भस्थानेविमुंचति॥जरायुनामुखेछन्नाकंठेचकफवेष्टिते॥वायोमार्गातिरोधाच
नगर्भस्थश्चरोदिति॥गर्भिनीप्रथमेहृष्टैःप्रहृष्टाभूषितासुचिः॥भवेत्शुक्लावरादेवगुरुविप्रार्चनेरताः॥भोज्यंच
मधुरंपायस्निग्धंहृद्यंदवंलघुः॥सरक्तंतंदीपयंयतुनिमवोपयोजयेत्॥गुर्विनीनतुकुर्वीतव्यायामतर्प्पनं॥व्य
वायंचनसेवेतनकुर्यादतितर्प्पणं॥रात्रौजागरणंशोकंपानस्यारोहणंतथा॥रक्तमोक्षंवेगरोधन्नकुर्याद्रुक्ष
टाशनं॥होषाभिर्घातैर्गर्भिन्यायोयोभागश्चपीयते॥समभागःशिशोन्तस्यगर्भस्तस्यपपीयते॥मलिनां
विकृताकारांहीनांगीनस्पृशेत्स्त्रियं॥नजिघ्रेदपिदुर्गंधन्नपश्यन्नयनाऽप्रियं॥वचांसिनापिशृणुयात्करणं
योरप्रियायच॥तान्नपर्युषितंभुंज्यंभुंजीतक्वथितंनच॥चैत्यस्मशानहृद्भाश्वभावाश्वाप्यपहस्करान्॥व

हिर्निष्क्रमनंक्रोधंशून्यागारंचवर्जयेत्॥नोच्चैर्ब्रूयान्नतकुर्याद्येनगर्भोविनश्यति:॥तैलाभ्यंगोवर्त्तनेचना
त्यर्थंकारयेदपि॥नामृद्धारुणांकुर्यान्नात्युच्चंशयनाशनं॥एतान्नियमान्सर्वान्यत्नात्कुर्वीतगुर्विणी॥नव
मेदशमेमासिनारीगर्भंप्रसूयते॥एकादशेद्वादशेवाततोत्रविकारत:॥अष्टहस्तयताचारुचतुर्हस्तविशा
लकं॥प्राचिद्वारमदग्धारंविदध्यात्सूतिकागृहं॥जातेहिशिलेकुक्षौमुक्तेहृदयबंधने॥सशूलेजघनेनारीवि
ज्ञेयाप्रशवोत्सुका॥आसन्नप्रसवायास्तुकटिपृष्ठंतुसव्यथं॥भवेन्मुहुस्प्रवृत्तिश्चमूत्रस्यचमलस्यच॥तैले
नात्यक्तगात्रांतांसस्नातामुष्णवारिणा॥यवागूपाययेत्कोष्णंमात्रायाघृतसंयुता॥कृतोपधानेमृदुनि
विस्तिर्णेशयनेसनै:॥आभुग्नस:क्थीचोतानौनारीतिष्ठेयथाचिता:॥चतस्रोशंकनीयाश्चसापनेकुश
लाहिता॥ब्रह्माख्यपरिचारेयुस्तांसम्यक्छिन्ननखा:स्त्रिय:॥अपामास्पर्गतैलेनसमत्यज्यसमंतत:॥एका
तुतामुभगेप्रवाहस्चेतितांवदेत्॥अथव्यथाप्रवाहिष्टाप्रवाहेथायथायदि:॥प्रवाहेथाशनैर्व्यूर्वप्रगाढं
चततःपरं॥ततोगाढतरंगर्भोयोनिद्वारमुपागते॥अपरासहितोगर्भोयावत्पदतिभूतले॥मूर्कंवावधिंकुर्य्ये
श्वासकाशक्षयाचितं॥सूतेस्त्रस्ततनुंबालमकालेतुप्रवाहनात्॥ ॥इतिश्रीवैद्यनाथदेवानन्दकृतेवै
द्यविधानसारेगर्भप्रकरणंनामषष्टमोध्याय:॥६॥ ॥अथबालस्यजन्मोत्तर:॥अथबालेसमुत्पन्नेविद:

धीतविधिंतथा॥तथैवकुलवृद्धस्त्रीव्यवहारपरंपदा॥प्रसूताहितमाहारंविहारंचसमाचरेत्॥व्यायामंमैथु
नंक्रोधंशीतशोकांविवर्जयेत्॥मिथ्याचारसूतिकायायोव्याधिरूपजायते॥सक्तकुसाध्योवाभवेत्पथ्यमाच
रेत्॥सर्वतःपरिश्रद्धास्यात्स्निग्धपथ्याल्पभाजना॥स्वेहाभ्यंगपरानित्यंभवेत्मासमतंद्रिता॥प्रसूतामार्द्धमा
सान्तेदृष्टेवापुनरार्त्तवे॥सूतिकानामहीनास्यादितिधन्वंतरेर्मतं॥चुपडवांविशुद्धांचविज्ञायवरवर्णिनी
॥उद्वर्त्यचतुर्भ्योमासेभ्योनियमंपरिहारयेत्॥रसप्रसादोमधुरपक्वारनिमित्तजः॥कृत्स्नदेहात्तनोपाप्तस्त
न्यमित्यभिधीयते॥स्तन्यंस्त्रिरात्त्रीणावाचतुरात्रादनंतरं॥प्रवर्त्तयंतिविद्वांसमन्योहृदयस्थिता॥प
यःपुत्रस्यसंस्पर्शाद्दृशीनांत्यरणादपि॥गृहणादस्युरोजस्यशुक्रवत्सप्रवर्त्तते॥स्नेहोनिरंतरस्तस्यप्रस
वेहेतुरुच्यते॥अल्पात्सल्याद्भयाच्छोकात्क्रोधादप्यपतर्पणात्॥स्त्रीणांस्तन्यंभवेत्स्वल्पंगर्भांतरविधार
णात्॥शालिव्यष्टिकगोधूमान्साक्षुद्रत्रयानपि॥कालसाकमलाचूंवनारिकेलंकसेरुकं॥शृंगाटकंवरी
चापिविडारिकंदमेवच॥लसुनंचडुग्धवृद्धेसेवेतसुमनाभवेत्॥कमलस्यतंडुलानांकल्कंयाक्षीरयेषितं
पिवति॥साभवतिप्रचुरतरक्षीरभरेनैवतुंगकुचयुग्मा॥कमलस्कलविख्यातोजायतेसरहृद्रे॥काश्मी
रदेशयेवोक्तोमहातंडुलसंज्ञक॥विडाकंडस्यारसंपिवेत्तन्यस्यवृद्धये॥तच्चूर्णितस्यवृद्ध्यर्थंपिवेद्वाक्षीर

संयुतं॥धात्र्यागुरुभिराहारैर्विषमैर्दोषलैस्तथा॥देहे दोषाः प्रकुप्यन्ति ततः स्तन्यं प्रदुष्यति॥मिथ्याहार
विहारान्पाडुष्टवातादयः स्त्रियाः॥दूषयंति पयस्तेन शरीरं व्याधयः शिशोः॥कषायसलिलस्राविस्तन्यं मा
रुतदूषितं॥पित्तादम्लं च कटुकं राज्यो भसितुपीतिका॥कफदुष्टं यज्जलतोयेनिमज्जति च पिच्छिलः॥द्वंद्वजं
तु द्विलिंगस्यात्त्रिलिंगं सानिपातकं॥धात्रीक्षीरविमुद्ग्यर्थं मूर्कमूषरसासिनी॥भार्गीदारुवचाष्विष्टा
ष्विवेत्सातिविषास्तथा॥पाठामूर्वीवृद्धभूनिम्बदारुशुंठिकलिंगकैः॥सारिवामत्स्यपित्तारेवेस्काथस्तन्य
विशोधनः॥पटोलनिम्बासनदारुपाठामूर्वागुडूचिकटुरोहिणीच॥सनागरं च क्वथितं च तोयं धात्रीपि
वेत्स्तन्यविशुद्धिहेतो॥नीरैत्पस्तं यदकीस्यादविवर्णामतं तु मत्॥पांडुरं तनुशीतं च तदुग्धं शुद्धमादिशेत्॥
पिता थ यदि बालस्य विदध्याडुपमातरं॥सुविचार्य गुणान्दोषान्कुर्याधात्रीं तदेदृशीं॥सवर्णां मध्यवय
सं सच्छिलां सुदितां सदा॥शुद्धदुग्धां वदुक्षीरां भवत्सामतिवत्सलां॥स्वाधीनामल्पसंतुष्टां कुलीनां सज्ज
नात्मजाम्॥कैतवेन परित्यक्तां निजपुत्रदृशं शिशौ॥शोकाकुलां क्षुधार्तां च श्रांतव्याधिमतीं सदा॥अत्यु
च्चानितरां नीचां स्थूलातीव भृशं कृशां॥गर्भिणीं ज्वरिणीं चापि लम्बे तत्पयोधरां॥अजीर्णभोजिनीं चापि
तथा पथ्यविवर्जिताम्॥आसक्तां क्षुद्रकार्येषु दुष्टां चंचलां पिच॥एतासां स्तन्यपातेन शिशुर्भवति सा

मयाः॥तत्रमातापसस्तांगिचारुवस्त्रापुरोमुखी॥उपविश्यासनेसम्यक्दक्षिणांस्तनमंबुगा॥प्रक्षाल्येष
त्परिश्राव्यमंत्राभ्यामभिमंत्रितं॥उदङ्मुखंशिशुंक्रोडेशनैराधायपाययेत्॥मातेत्युपलक्षणंधात्रीचइयत्य
रिस्त्राव्यः॥अस्त्रावितस्तनंबालःविवन्तस्तन्येनभूयसा॥पूर्णाश्रोतावमीकाशश्चाशोभवतिपीडितः॥क्षीरनीर
निधिस्तेतुस्तनयोःक्षीरपूरकः॥सदैवसुभगोबालोभवत्येषमहाबलः॥पयोमृतंसमंपीत्वाकुमारस्तेशुभा
नने॥दीर्घमायूरवाप्नोतुदेवाप्याप्यामृतंयथा॥क्षीरंसात्म्यतयाक्षीरमाजङ्ग्यमथापिवाः॥दद्याद्दास्त
न्यपर्याप्तेबालेभ्योवीक्षणमात्रया॥यतःशिशोःक्षीरमेवसात्म्यंभवतिनत्वन्नादिकं॥यथोक्तविधिनावा
लेमासिषष्ठेमेपिचः॥अन्नंप्राशयत्किंचित्ततःस्तन्यंदद्यात्क्रमात्॥बालमंकेसुखंदध्यान्नचैनंतर्जयेत्क्व
चित्॥सहसाबोधयेन्नैवनायोग्यमुपवेशयेत्॥नाक्रुद्ध्यास्थापयेत्क्रोडेनक्षिपेच्छयनेक्षिपेत्॥रोदयन्नक्व
चित्कार्यंविधिमावश्यकंविना॥तच्चित्तमनुवर्त्तेतनंसदैवानुमोदयेत्॥संसेवितमनास्त्वंनित्यमवाभिवर्द्ध
ते॥बलातपतहिहृष्टिधूमानलजलादितः॥निस्त्रोच्चस्थानश्चापिरक्षेद्बालंप्रयत्नतः॥अभ्यङ्गोद्वर्त्तनेस्ना
नेनत्रयोरंजनंतथा॥वमनंमृदुयेतच्चतथामृद्वनुलेपनं॥जन्मप्रभृतिपथ्यानिबालस्येतानिसर्वथा॥क

वलभ्यंङ्गमाद्वर्षाद्दृष्टमांत्रस्यकर्मच॥विरेकस्योद्दशाद्वर्षाद्विशतेश्चैवमैथुनं॥वयस्तुत्रिविधंबाल्यम

ध्यमंवार्द्धकंतथा॥ उत्तमोऽशवर्षेलुनगोवाल्येनिगद्यते॥ त्रिविधःसोपिदुग्धाशीदुग्धान्नाशीतथाभुक॥
दुग्धाशीवर्षपर्यंतंदुग्धान्नाशीशरद्वयं॥ तदुत्तरंस्यादन्नाशीएवंवालस्त्रिधामतः॥ मध्येसोऽशसप्तभ्योमं
ध्यमस्कथितोबुधैः॥ चतुर्द्धामध्यमंप्राप्तंपूर्वापूर्णःक्षयाचितः॥ भवेद्धाविंशतिप्रांसुर्यावत्वात्रिंशतोमत॰
॥ चत्वारिंशत्समायावतिष्ठेद्धीर्यादिपूरितः॥ ततःक्रमेणास्याद्यावद्भवतिसप्ततिः॥ ततःस्तुसप्ततेरूर्द्धंक्षीणाधा
तुरसादिकः॥ क्षीयमाणेन्द्रियबलक्षीणरेतादिनेदिने॥ वलीपलितखालिभ्ययुक्तस्कर्मसुवाक्षमः॥ कासश्वा
सादिभिःक्लिष्टेवृद्धोभवतिमानवः॥ वाल्येविवर्द्धतेश्लेष्मापित्तंस्यान्मध्यमेधिकं॥ वर्द्धकेवर्द्धवायुर्चिचार्यैत
दुपक्रमेत्॥ वाल्येवृद्धिछविर्मेधात्वग्दृष्टिःशुक्रःविक्रमौ॥ वुद्धिकर्मेन्द्रियंचेतोजीवितंदशनोहरेत्॥ अत
ऊर्द्धंप्रवक्ष्यामिप्रकृतिलक्षणानिच॥ सप्तप्रकृतयोनृणांवातपित्तात्कफास्तथा॥ संसर्गात्संनिपाताच
भवंतिभिषजांमते॥ शुक्रशोणितसंयोगपयोदोषस्तुत्कटोभवेत्॥ प्रकृतेर्जायतेतेनतस्यालक्षणमुच्य
ते॥ शुक्राशृगार्भिणीभोज्यचेष्टागर्भाशयस्थिषु॥ यःस्यादोषोधिकस्तेनप्रकृतिःसप्तधोदिताः॥ जागरु
कोल्पकेशश्चस्फुटितोद्विकरस्कृनाः॥ शीघ्रगोवहुवाग्रूक्षस्चत्रेविपतिगच्छति॥ एवंविधोयःसज्ञेयोवा
तप्रकृतीकोनरः॥ पित्तप्रकृतिकोयादृक्तादृशोऽथनिगद्यते॥ अकालपलितोगौरःक्रोधीस्वेदीचवह्निः

मान्॥वहुभुक्ताग्रनेत्रश्चस्वप्नेज्योतिषिंपश्यति॥श्यामकेशःक्षस्थूलोवहुवीर्योमहावलः॥स्वप्नेजलाश
यालोकीश्लेष्मप्रकृतिकोभवेत्॥दृश्यतेपृक्कतौयत्रहरुपंदोषद्वयस्यतु॥तासंसर्गेनजानीयात्सर्वलिंगैःत्रि
दोषजा॥अथान्यानपिवाग्भटप्राहप्रकृतिलक्षणं॥शीतद्विषश्चलक्षतिस्मृतिवुद्धिचेष्टाःमोहार्द्धदृष्टिग
तयोतिवहुप्रलापा॥अल्पपित्तकफजीवितनिद्राःसत्त्वसक्तवलजज्जरवाच॥नास्तिकावभुजःसविला
सागीतहास्यमृगयाकलिलोला॥मधुराम्लपटुस्नसात्म्यकांक्षाक्लशहीर्घाकृतयःसशब्दपाताः॥नदृष्टान
जितेन्द्रियचार्याःनचकांतादयितावहुप्रजावा॥नेत्राणिचैषांखरधूसराणिवृत्तानिचारूणिमृतोपमाणिः
॥उन्मीलितानिभवन्तिसुप्तेशैलेहुमास्तेगगनंप्रयांति॥अधन्यामत्सराध्माताःस्तेनाप्रोद्वद्धपिंडिका॥श्व
सृगालोष्ट्रगृध्राखुकाकालूकाश्ववातिकाः॥पित्तंवह्निवाह्निजंचतदस्मातपित्तोदिक्तस्तीव्रतृष्णावभूक्षुः
।गौरोहलांगस्तामहस्तोहिवभुःशूरोमानिपिंगकेशोल्परोमाः॥दयितमाल्यविलेपनमंडलःसुचिराभृतव
स्त्रलः॥विभवसाहसवुद्धिवलान्वितोभवतिभीरुगतिद्विषतामपि॥मेधावीप्रशिथिलितसंधिवंधमां
सोरणारीणामनभिमतोल्पशुक्रकामः॥आवासश्चलिततरंगनीरकानातभुक्तेन्नमधुरकषायतिक्तशी
तम्॥धर्म्मद्वेषीस्वेदनपूतिगंधिभूर्युचारक्रोधपान्यशनेर्य्यः॥सुप्तःपश्येपर्णिकाराण्यलाशान्दिग्दाहो

र्क्षाविद्युदर्क्षानालांश्च॥तनूनिपिंगानिवलानिचैषांतनूनयपक्ष्माणिहिमप्रियाणिक्रोधेनमद्येनरवेश्वमा
सागंवजंत्याशुविलोचनानि॥मध्यायुषोमध्यवलापंडिताक्लेशसहाःखः॥व्याघ्रर्क्षकपिमार्जारयक्षभूताश्च
पैतिकाः॥श्लेष्मशोमःश्लेष्मलस्तेनसौम्योमूढस्निग्धश्लिष्टसंधिस्थिरमांसः॥क्षुत्तृड्दुःखक्लेसघर्मैरतप्तो
बुद्ध्यासुक्तःसात्विकःसत्यसंधः॥प्रियंगुदूर्वाशरकाण्डदर्भगोरोचनापद्मसुवर्णवर्णः॥प्रलंबबाहुःपृथुपी
नवक्षाःमहाललाटोघननीलकेशः॥मृदंगःसमसुविभक्तचारुदेहोवहोजारतिरसयुक्तपुत्रभृत्यः॥धर्मा
त्मावहतिननिष्ठुरंचजातुःप्रच्छन्नंवहतिदृढंचिरंचवैरं॥समरक्षिरहेन्द्रतुल्यवानोजलदांबोधिमृदंगशं
खघोषः॥स्मृतिमानधियोगवान्विनीतोनचचाल्येप्यतिरोहनोनलोलः॥तिक्तंकषायंकटुकोष्णरूक्षमल्पं
सभुक्तेबलवांस्तथापि॥रक्तान्तसुस्निग्धविशालदीर्घसुव्यक्तशुक्लाशितपक्ष्मलाक्षः॥अव्याहारक्रोधपानाश
नेहःप्रज्ञाविनीतोदीर्घसूत्रीवदान्यः॥हृद्गंभीरःस्थूलकक्षाक्षमावान्आर्योनिद्रालुवह्वचित्रकृतज्ञः॥ऋतुविप
श्चित्सुभगःसुलज्जोःभक्तोगुरूणांस्थिरसौहृदश्चः॥स्वप्नेसपद्मान्सविहंगमालान्तोयाशयान्यश्पतितोय
